# Shiva Stava by Brahma and Vishnu

# શિવસ્તવઃ બ્રહ્મવિષ્ણુકૃતઃ

## Document Information

Text title : Shiva Stava by Brahma and Vishnu

File name : shivastavaHbrahmaviShNukRRitaH.itx

Category : shiva

Location : doc_shiva

Transliterated by : NA

Proofread by : NA

Description/comments : Mudgalapurana, Khanda 1, Adhyaya 13

Latest update : April 23, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# શિવસ્તવઃ બ્રહ્મવિષ્ણુકૃતઃ

શ્રીગણેશાય નમઃ ।
બ્રહ્મવિષ્ણૂ ઊચતુઃ ।
નમસ્તે શઙ્કરાયૈવ નમસ્તે શૂલપાણયે ।
રુદ્રાય કાલરૂપાય ત્ર્યમ્બકાય નમો નમઃ ॥ ૪૨॥

ઉમાપતે નમસ્તુભ્યં વૃષભેશ્વરવાહન ।
આદિદેવાય દેવાય મહાદેવાય તે નમઃ ॥ ૪૩॥

પ્રસીદ ભગવન્ શમ્ભો નાન્તં પશ્યાવહે વિભો ।
કિંરૂપં કિંસ્વભાવં ત્વાં ન જાનીવઃ કથઞ્ચન ॥ ૪૪॥

દર્શય સ્વાત્મરૂપં ભો મહેશ્વર નમોઽસ્તુ તે ।
યેન તે ભજનં દેવ જનાઃ કુર્વન્તિ નિર્ભયાઃ ॥ ૪૫॥

તયોર્વચનમાકર્ણ્ય શમ્ભુઃ પ્રાકટ્યમાસ્થિતઃ ।
તતસ્તં તૌ દદૃશતુર્હરિશ્ચ ભગવાન્ વિધિઃ ॥ ૪૬॥

વામભાગે સ્થિતં વિષ્ણું દક્ષિણાઙ્ગે પિતામહમ્ ।
વિશ્વં ચરાચરં સર્વં લિઙ્ગં તત્રાસ્ય સંસ્થિતમ્ ॥ ૪૭॥

અપારમહિમાનં તં દૃષ્ટ્વા નેમતુરાદરાત્ ।
ઉપસંહર રૂપં તત્ત્વમેવ પરમેશ્વરઃ ॥ ૪૮॥

તયોર્વચનમાકર્ણ્ય હૃષ્ટઃ સન્ શઙ્કરઃ પ્રભુઃ ।
ભગવાન્ પૂર્વરૂપેણ સન્તસ્થૌ વૃષભધ્વજઃ ॥ ૪૯॥

ઉવાચ તૌ મહાદેવો વૃણુતં વરમીપ્સિતમ્ ।
દાસ્યામિ ભવતોર્ભાવાત્ સ્તોત્રસન્તુષ્ટમાનસઃ ॥ ૫૦॥

ય એતત્પઠતિ સ્તોત્રં સ કામાન્ લભતેઽખિલાન્ ।
મત્પ્રિયઃ સોઽપિ ભવતિ મલ્લોકેઽન્તે પ્રગચ્છતિ ॥ ૫૧॥

ઇતિ બ્રહ્મવિષ્ણુકૃતઃ શિવસ્તવઃ । ૧.૧૩

*Shiva Stava by Brahma and Vishnu*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*